# निवापाञ्जलिः

हरिप्रसाद् ,वि.टि.कटम्बूर्

स्मरामि 'अषीक्कोट्' महाशयस्या–
प्यदृष्टपूर्वान् प्रतिभाविशेषान्।
पूज्याय शिष्यार्पितवैभवाय
यशःशरीराय नमोस्तु तस्मै।।1

*वीचिक्षोभसमन्वितस्य जलधेः श्रुत्वा महागर्जनं
भीत्या स्थूलतनुः प्रकृष्टविभवः  पोतोपि विभ्राम्यति।
अन्तःसारविलुप्तशून्यविभवा नौका कथं वर्तते
गम्भीरोज्वलसारगर्भितवपुः कोयं महासागरः?2

आढ्यो यः 'सुकुमार'रत्नविभवैरत्युन्नतैरुज्वलै–
र्यस्तेजोभिरधृष्य एव युगपत् यश्चाभिगम्यः पुनः।
स्पष्टं शिष्टजनेतरस्य हृदये नित्यं भयं कुर्वते
सद्वाचस्पतये विशुद्धमतये तस्मै नमःकुर्महे।।3

लोके 'वाग्भट' इत्यपूर्वबिरुदैर्लोकैः सदा कीर्तितः
सोयं वाग्भटशिष्यरादिकवितोप्यद्यावधि प्रस्फुटम्।
रम्ये काव्यपथे चरन् बहुविधैर्लेखैश्चिरं कैरली–
मस्मांश्च परितोषयन् यवनिकां कालस्य सम्प्राप्तवान्।।4

यो **'ब्रह्माभय'मित्यनन्यसुलभेनाप्तोपदेशेन नो
निर्भीकान् निरवद्यतोषसुषमान् कर्तुञ्च सम्यास्यति।
त्वय्यन्यत्र गते भयेन चकितो दुःखाश्रुभिर्गद्गदै–
स्तुभ्यं देव! समर्पयामि तव शिष्योहं निवापाञ्जलिम्।।5

* वर्षद्वयाद्पूर्वं अषीक्कोट् महाशयस्येव हस्तयोः समर्पितमासीत् एतत्पद्यद्वयम्।

** महावाक्यकल्पमिति अषीक्कोट् महाशयेनोक्तं 'अभयं वै ब्रह्म' इत्युपनिषद्वाक्यम्।